# B.K. BIRLA CENTRE FOR EDUCATION

SARALA BIRLA GROUP OF SCHOOLS
A CBSE DAY-CUM-BOYS' RESIDENTIAL SCHOOL

**PRE-BOARD-1 EXAMINATION (2025-26)**

**SANSKRIT (119)**

| | |
|---|---|
| Class : X | Duration : 3 Hrs |
| Date :10.11.2025 | Max. Marks : 80 |
| Admission No.: | Roll No.: |

---

सामान्यनिर्देशाः -

1. कृपया सम्यकतया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| 'क' खण्डः | अपठितवयोधनम् | 10 अङ्काः |
| 'ख' खण्डः | रचनात्मक कार्यम् | 15 अङ्काः |
| 'ग' खण्डः | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' खण्डः | पठितावबोधनम् | 30 अङ्काः |

3. प्रत्येक खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्य लेखनीयः।
5. प्रश्नस्य कमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीमानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः 'क'

## अपठितावबोधनम् (10 अङ्काः)

प्रश्न 1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- (10 अङ्काः)

एकदा विक्रमादित्यः नगरभ्रमणसमये एकं मरणासन्नं रुग्णं दृष्टवान्। तस्य दर्शनेन मनसि वैराग्यम् उद्भुतम्। अतः मायामोहमयं संसारं ज्ञात्वा सः महामन्त्रिणं राज्यभारं समर्प्य वनम् अगच्छत्। वने सः कठिनां तपस्याम् आरब्धवान्। तस्य समीपे एव एकः महात्मा अपि तपस्यारतः आसीत्। महात्मा तम् अवदत् "राजन् भवान् तु यथानीतिः राजधर्मस्य पालनं करोतु। धर्मानुकूलं शासनम् अपि धर्म एव भवति' इति स महात्मा विक्रमादित्यम् उपदिष्टवान्। विक्रमः अवदत् "नहि महात्मन् ! तपसा एव परलोकः साध्यते, कर्मणा नेति।" महात्मा अवदत् "राजन् राज्ञः धर्मः प्रजापालनं, शासनम् एव अस्ति, तपस्या तु महात्मनां कर्म इति।" इत्युक्त्वा सः तूष्णीम् अभवत्।

(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) (1×2=2)

(i) नगरभ्रमणं कः करोति स्म?
(ii) वैराग्यं कुत्र उद्भूतम् ?
(iii) सः कीदृशीं तपस्याम् आरब्धवान् ?

(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयमेव) (2×2=4)

(i) राज्ञः धर्मः किम् अस्ति?
(ii) महात्मनां कर्म किम् अस्ति?
(iii) महात्मा विक्रमादित्यं किम् उपदिष्टवान्?

(इ) अस्य गद्यांशस्य उचितं शीर्षकं लिखत। (1×1=1)

(ई) यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्) (1×3=3)

(i) 'दृष्टवान्' इति क्रियापदस्य कर्तृपदं किम्?

(क) रुग्ण: (ख) मरणासन्नः

(ग) विक्रमादित्यः (घ) एकदा

(ii) 'भवान्' इति कर्तृपदस्य क्रियापदं किम्?

(क) करोतु (ख) राजधर्म:

(ग) यथानीतिः (घ) शासनम्

(iii) 'मौनम्' इति अर्थे किं पदं प्रयुक्तम् ?

(क) अस्ति (ख) तूष्णीम्

(ग) उक्त्वा (घ) अभवत्

(iv) 'अकर्मणा' इति पदस्य विपर्ययपदं किं आगतम्?

(क) कर्मणा (ख) धर्मणा

(ग) यथानीतिः (घ) उक्त्वा

प्रश्न 2. भवती प्रभा अस्ति। मातरं प्रति स्वस्वास्थ्यविषये लिखितम् इवं पत्रं मञ्जूषायाः सहायतया पुनः सम्पूर्ण लिखतु - (10×½=5)

विद्यालयपरिसरः

(i) ---------

समादरणीयाः (ii) ---------

सादरं प्रणामाः।

अत्र कुशलं तत्रास्तु। सम्प्रति मम (iii) --------- परीक्षा सञ्चरति। अत्र छात्रावासे पठनस्य वातावरणं तु शोभनं वर्तते। अत्र अध्यापकाः अपि च अतीव कर्मठाः सन्ति। अतः पठनस्य कार्यं (iv) --------- एव भवति, परंतु अध्ययनकारणात् शयनस्य भोजनस्य च (v) --------- एव न प्राप्यते। अतः अद्यत्वे मम (vi) --------- सुष्ठु नास्ति। अहं (vii) --------- पीडिता अस्मि। परं काचिद् अपि (viii) --------- नैव करणीया। आशासे अहं शीघ्रमेव पूर्णतया स्वस्था भविष्यामि। परीक्षायाः अनन्तरं (ix) --------- आगमिष्यामि। तदा वयं मिलित्वा भ्रमणाय वाराणसीनगरं गमिष्यामः। पित्रे (x) ---------

भवत्याः पुत्री

प्रभा

मञ्जूषा

वार्षिकी, शिमलातः, ज्वरेण, मातृचरणाः, गृहम्, स्वास्थ्यम्, समुचितम्, नमः, समयः, चिन्ता

प्रश्न 3. प्रदत्तं चित्रं दृष्ट्वा मंजूशापद सहायतया संस्कृतेन पञ्च वाक्यानि रचयत - (5×1=5)



| मंजूषा |
| --- |
| लम्बोदरः, दीपः, मोदकं, पुष्पाणि, परिवारः, गणेशोत्सवः, आरती, आसनं, पुष्पहारं, पुष्पगुच्छः, अस्ति, वर्तते, विद्यते, फलानि, हाराणि, सन्ति, शुण्डः, गज इव मुखः |

अथवा

'पुस्तकालयः' इति विषयम् अधिकृत्य मञ्जूषापदसाहाय्येन पञ्च संस्कृतवाक्यानि लिखत ।

पुस्तकानि, तूष्णीम्, अनेकानि, जनाः, समाचारपत्रम्, स्थातव्यम्, आगच्छन्ति, अनेके, अनेकेषाम्, विषयाणाम्, ग्रन्थाः, ज्ञानवर्धनम्, अध्ययनम्, महत्त्वपूर्णम्

प्रश्न 4. रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं प्रपूर्य पुनः लिखत - (5×1=5)

यज्ञेशः - प्रिय मित्र ऋत्विक् । मया श्रुतं यत् आगामिसत्रात् कक्षा नवमदशम्योः पुनः सम्प्रेषणात्मकं संस्कृतं पाठयिष्यते, किं सत्यम्?

ऋत्विक् - आम्, (i) -------------।

यज्ञेशः - एतत् कथम् अभवत्? किं शेमुषी पुस्तकाधारितं संस्कृतं न पाठयिष्यते ?

ऋत्विक् - यदा शेमुषी पुस्तकाधारितः संस्कृतपाठ्यक्रमः आगतः तर्हि छात्रेभ्यः- सः (ii) -------------।

यज्ञेशः - किं कठिनम् आसीत् तस्मिन् पाठ्यक्रमे?

ऋत्विक् - तस्मिन् पाठ्यक्रमे (iii) -------------।

यज्ञेशः - आम्। पूर्णपत्रलेखनम्, अनुवादकार्यम्, भावलेखनम्, तु मध्यमपि कठिनं प्रतीयते? परं पाठाः कीदृशाः आसन् ?

ऋत्विक् - (iv) -------------।

यज्ञेशः - किं सम्प्रेषणात्मके संस्कृते एताः कठिनताः न सन्ति?

ऋत्विक् - सम्प्रेषणात्मके संस्कृते तु (v) -------------। पाठाः अपि अपेक्षया सरलाः सन्ति।

मञ्जूषा

पाठाः अपि अपेक्षाकृत कठिनाः आसन, पूर्णपत्रलेखनम् अनुवादकार्यम् च न स्तः, इदं सत्यम् अस्ति यत् आगामिसत्रात् कक्षा नवमदशम्योः पुनः सम्प्रेषणात्मकं संस्कृतं पाठयिष्यते, पूर्णपत्रलेखनम्-अनुवादकार्यम्-कथाक्रमादयः तु छात्रेभ्यः कठिनाः प्रतीयन्ते स्म, कठिनः प्रतीयते स्म

अथवा

मञ्जूषापदसाहाय्येन कथायाः रिक्तस्थानानी पूरयित्वा कथां पुनः लिखत - (10×½=5)

अहिंसायाः साक्षात्प्रतिमा भगवान् (i) -------- एकदा कोसलदेशस्य राजधानी श्रावस्तीम् अगच्छत्। तदा तत्र नृपः प्रसनजितः (ii) -------- अकरोत्। सायंकाले भगवतः प्रवचने श्रोतृणां सङ्ख्या (iii) -------- आसीत् । तस्याः कारणं भगवता पृष्टम्। तदा जनाः नृपश्च विभेत्य नृशंसस्य

दस्योः अङ्गुलिमालस्य (iv) -------- अकुर्वन् । एतद् ज्ञात्वा भगवान् बुद्धः तं प्रति (v) -------- गतवान् । विपिने महात्मानं बुद्धं दृष्ट्वा (vi) -------- तस्मै स्थातुम् अकचयत्। तं भयङ्कराकृतिं दृष्ट्वा अपि न बिभेत्य बुद्धः अकवयत्- "पुत्र! तव (vii) -------- अहं तु अतिष्ठम् परं त्वं कदा स्थास्यसि।" सः पुनः तं शिक्षयन् विस्तारेण कथितवान् - "वत्स! अस्मिन् संसारे पूर्वस्मात् एव अनेकानि (viii) -------- सन्ति तानि निरन्तरं जनान् पीडयन्ति। त्वं (ix) -------- कथं तानि वर्धयसि अतः त्वं तेभ्यः विरम।" बुद्धस्य उपदेशं श्रुत्वा मत्वा च सः दस्युः (x) -------- निक्षिप्य तस्य चरणयोः अपतत् तस्य च भक्तः अभवत् ।

मञ्जूषा

अङ्गुलिमालः, स्वखड्ङ्गम्, अतिन्यूना, बुद्धः, राज्यम्, वनम्, कष्टानि, स्वपापाचरणैः, चर्चाम्, कथनेन

'ख' खण्डः

रचनात्मक कार्यम् (15 अङ्काः)

प्रश्न 5. अधोलिखितवाक्येषु रेखांकितपदानां संधिं विच्छेदं वा कृत्वा लिखत - (4×1=4)

(i) पक्षिः शाखायां (<u>तिष्ठन् + शेते</u>) ----------- |

(ii) (<u>मदोद्धता</u>) ------ + ------ कपयः प्रहस्य अवदन् |

(iii) (<u>वाताः + वान्ति</u>) ------------- सर्वतः अत्र |

(iv) यदा यदा हि सर्वत्र (<u>ग्लानिर्भवति</u>) -------- + -------- भारत !

अथवा

(i) पूर्वदिशि (<u>रविः + उदेति</u>) ----------- |

(ii) ईश्वरस्य (<u>पावनं</u>) ------ + ------ दर्शनं जातम् |

(iii) देवासुर संग्रामे (<u>देवाः + जयन्ते</u>) ------------- |

(iv) शिक्षकः यद्वदति छात्रः (<u>तच्छृणोति</u>) -------- + -------- |

प्रश्न 6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा कृत्वा लिखत - (4×1=4)

(i) <u>विद्याहीनः</u> पशुसमानः भवति |

(क) विद्यायां हीनः (ख) विद्यां हीनः

(ग) विद्यया हीनः (घ) विद्यायाः हीनः

(ii) <u>पयोदः</u> तु प्रसन्नतादायकः अस्ति |

(क) पयः ददाति इति (ख) पयो ददाति इति

(ग) पयः दधाति इति (घ) पयो दधाति इति

(iii) <u>पुत्रौ</u> दृष्ट्वा माता प्रसीदति |

(क) पुत्रं च पुत्रं च (ख) पुत्रं च पुत्राय च

(ग) पुत्र: च पुत्रं च (घ) पुत्र: च पुत्र: च

(iv) सः <u>उपनेत्रम्</u> धारयति ।

(क) नेत्रस्य योग्यम् (ख) नेत्रयोः समीपम्

(ग) नेत्रम् अनतिक्रम्य (घ) नेत्रम् नेत्रम् इति

प्रश्न 7. रेखाङ्कितपदेषु प्रकृति-प्रत्यययोः संयोजनं विभाजनं वा कृत्वा पुनः लिखत - (4×1=4)

(i) किं <u>कुपिता</u> एवं भणति?

(क) कुपिता + टाप् (ख) कुपित + टाप्

(ग) कुपितः + ङीप् (घ) कुपित + इक्

(ii) <u>बुद्धि + मतुप्</u> सा भयात् विमुक्ता।

(क) बुद्धिवान् (ख) बुद्धिमानः

(ग) बुद्धिमान् (घ) बुद्धिमती

(iii) तदेव <u>सम + त्व</u> कथ्यते।

(क) समत्वम् (ख) समत्वः

(ग) समता (घ) समत्त्वम्

(iv) इयम् घटना <u>कल्पना + ठक्</u> अस्ति।

(क) कल्पनिक (ख) कल्यापनिक

(ग) कल्यानिक (घ) काल्पनिक

प्रश्न 8. अधोलिखितवाक्येषु कर्तृपदवाक्यानि कर्मवाच्ये परिवर्त्य वाक्यानि पुनः लिखत- (3×1=3)

(i) बालकः पायसं खादति।

(ii) अहं फलं खादामि।

(iii) त्वं किं शृणोषि ?

अथवा

वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -

(i) भो वासव! पुत्रस्य दैन्यं दृष्ट्वा मया ---------- ।

(ii) सः दीन इति जानन्नपि सः कृषकः --------- पीडयति ।

(iii) किम् एतत् भवता न ---------- ?

मंजूषा - (तम्, रुद्यते, दृश्यते)

प्रश्न 9. अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पुरयत- (3×1=3)

(ii) --------- (8:15) बादनतः ---------- (9:00) वादनपर्यन्तं विज्ञानविषयस्य कालांशः भवति।

(ii) वयं --------- (9:00) बादनतः ---------- (9:45) वादनपर्यन्तं गणितविषयं पठामः।

(iii) --------- (2:45) बादनतः (3:30) -------- वादनपर्यन्तं हिन्दीभाषाकालांशः भवति।

प्रश्न 10. इमं संवादम् उचितैः अव्ययपदैः पूरयत - (4×1=4)

मञ्जूषा – अपि, अधुना, नूनम्, उच्चैः

रसा - विश्रुतः मेघाः (i) ---------- गर्जन्ति।

विश्रुतः - आम् (ii) -------- वृष्टिः भविष्यति।

रमा - अवश्यम्, त्वम् गृहात् बहिः मा गच्छ।

विश्रुतः - तर्हि अहम् (iii) ------- दूरदर्शने एव नाटकम् पश्यामि।

रमा - विश्रुत! समाचारम् अपि शृणु, दशमकक्षायाः परीक्षापरिणामस्य सूचना (iv) ------- संभवेत्।

प्रश्न 11. अधोलिखितवाक्येषु रेखांकित अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - (3×1=3)

(1) <u>मार्गं</u> गहनकानने सा एकं व्याघ्रं ददर्श ?

(क) मार्गः (ख) मार्गे

(ग) मार्गात् (घ) मार्गाय

(ii) सः ह्यः पदातिरेव <u>चलिष्यति</u>।

(क) अचलत् (ख) अचलः

(ग) चलतु (घ) चलेत्

(iii) किं सा <u>कुपितः</u> एवं वदति ?

(क) कुपितौ (ख) कुपिता

(ग) कुपिताः (घ) कुपिते

'ग' खण्ड:

अनुप्रयुक्तव्याकरणम् 25 अङ्का:

प्रश्न 12. अधोलिखितान् पद्यांशान् पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) (2×½=1)

(i) मनुष्यः प्रभूतानि कानि इच्छति?

(ii) मनुष्यः आत्मनः किम् इच्छति ?

(iii) केभ्यः कदापि अहितं न कुर्यात् ?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) (2×1=2)

(i) यः आत्मनः श्रेयः इच्छति, स किं न कुर्यात् ?

(ii) कः स्वजीवने सुखानि इच्छति ?

(iiii) यः आत्मानः प्रभूतानि सुखानि इच्छति, सः किं न कुर्यात् ?

III. निर्देशानुसारम् उत्तरत- (2×1=2)

(i) 'सुखानि' पदस्य विशेषणपदं किम् ?

(ii) 'दुःखानि' इति पदस्य कः विपर्ययः श्लोके प्रयुक्तः ?

अथवा

(i) 'यः' इति कर्तृपदस्य क्रियापदं किम् ?

(ii) स: परेभ्यः अहितं कर्मं न कुर्यात् वाक्येस्मिन कर्तृपदं किम् ?

प्रश्न 13. अधोलिखितान् गद्यांशान् पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

दुष्टबुद्धिः तु तयोः वार्ता श्रुत्वा झटिति एव क्षेत्रं गतः। तत्र अश्वत्थमूलं च खनित्वा तं सुवर्णकलशं प्राप्तवान् । यदा सः तस्य आवरणम् अपसारयति तदैव भयङ्करम् एकं विषधरं फूत्कारं कुर्वन्तं पश्यति । भीतः सः कलशं पुनः आवृत्य तं च आदाय मित्रस्य गृहं समागतः । स्वमित्रं सर्पेण मारयितुम् इच्छन् सः भित्तौ सन्धिं प्रकल्प्य तन्मध्यतः कलशं गृहाभ्यन्तरे क्षिप्तवान् । विचित्रा खलु दैवगतिः । पतितात् कलशात् बहिः निर्गत्य विषधरः तमेव दुष्टबुद्धिं दष्टवान् । कलशपातशब्देन प्रबुद्धौ तौ दम्पती आश्चर्येण प्रचुरमणिमाणिक्यानाम् आभया भासमानं निजगृहं दृष्ट्वा परस्परम् अवलोकयन्तौ अतिष्ठताम् ।

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) (2×½=1)

(i) दैवगतिः कीदृशी खलु ?

(ii) अश्वत्थमूलं खनित्वा दुष्टबुद्धिः किं प्राप्तवान् ?

(iii) का विचित्रा ?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) (2×1=2)

(i) प्रबुद्धौ तौ दम्पती आश्चर्येण किम् अपश्यताम् ?

(ii) विषधरः कं दष्टवान् ?

(iii) किं कृत्वा दुष्टबुद्धिः सुवर्णकलशं प्राप्तवान् ?

III. निर्देशानुसारम् उत्तरत- (2×1=2)

(i) 'भयङ्करम्' इत्यस्य विशेषणस्य विशेष्यपदं किम् ?

(ii) गद्यांशे 'शीघ्रम्' अस्य पर्यायपदं किं प्रयुक्तम् ?

अथवा

(i) 'सः कलशं गृहाभ्यन्तरे क्षिप्तवान् ।' अस्मिन् 'सः' इति कर्तृपदस्य क्रियापदं किम् ?

(ii) 'सर्प' शब्दस्य गद्यांशे किं पर्यायपदं प्रयुक्तम् ?

प्रश्न 14. अधोलिखितनाट्यांशान् पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

राजीवः - किम् एतत् कस्यचित् दुर्गस्य चित्रम् ?

पर्यटनाधिकारी - आम् ! एतत् दिवांग-उपत्यका-मण्डले स्थितं भीष्मकनगरदुर्गम् ! अस्य अवशेषाः तु आर्यकला - संस्कृति - सम्पदः परिचायकाः । अधुना इदं चित्रं पश्यत ।

शैलेशः- अहं जानामि इदं स्थानम्। इदं तु 'तवाङ्ग गोम्पा' इति प्रसिद्धः बौद्धमठः

पर्यटनाधिकारी - सम्यक् अभिज्ञातम् ! मनोहरे सुरम्ये 'तवाङ्ग' इति स्थले राजते अयं बौद्धमठः। पञ्चशतानां बौद्धभिक्षूणां निवासयोग्या स्थली इयम् । लोहितजनपदे अपि अनेकबौद्धविहाराः सन्ति ।

नीलिमा - मान्यवर ! मया अस्य प्रदेशस्य 'परशुरामकुण्डम्' इति दर्शनीयस्थलविषये अपि पठितम् ! किम् इदम्?

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) (2×½=1)

(i) भीष्मकनगरदुर्गम् कस्मिन् मण्डले स्थितम् ?

(ii) कस्मिन् जनपदे अनेके बौद्धविहाराः सन्ति ?

(iii) कस्य अवशेषाः आर्यकला-संस्कृति-सम्पदः परिचायकाः सन्ति ?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) (2×1=2)

(i) प्रसिद्धः बौद्धमठः को वर्तते ?

(ii) भीष्मकनगरदुर्गस्य अवशेषाः केषां परिचायकाः सन्ति ?

(iii) अरुणाचलप्रदेशे परशुरामकुण्डम् किम् अस्ति ?

III. निर्देशानुसारम् उत्तरत- (2×1=2)

(i) नाट्यांशे 'सन्ति' इति क्रियायाः कर्तृपदं किम् ?

(ii) 'अधुना इदं चित्रं पश्यत।' अत्र 'चित्रम्' विशेष्यपदस्य विशेषणपदं किम् ?

अथवा

(i) 'राजते अयं बौद्धमठः ।' अस्मिन् वाक्ये क्रियापदं किम् ?

(ii) 'प्रासादं' इत्यर्थे किं पर्यायपदं प्रयुक्तम् ?

प्रश्न 15. रेखांकितपदान् आधृत्य प्रश्ननिर्माणं कुरुत – (5×1=5)

(1) पापकर्मणा द्रोणिना <u>मे</u> पुत्राः हताः |

(2) जीवने सहते स <u>सुखी</u> नरः ।

(3) <u>मदोद्धताः</u> कपयः प्रहस्य अवदन् ।

(4) <u>अर्थिनः</u> धनलाभमात्रेण संतोषं भजन्ते |

(5) लोके <u>चक्षुषः</u> दानं दुष्करमेव भवति |

प्रश्न 16. अधोलिखितश्लोकस्य अन्वयं समुचितपदैः पूरयत - (4×½=2)

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधेद्भवं वेगं, स युक्तः स सुखी नरः ॥

अन्वयः - हे अर्जुन ! अस्मिन् एव संसारे यः मनुष्यः(i) -------- पूर्वमेव कामस्य (ii) --------- च तीव्र वेगं सोढुं (iii) --------- भवति| सः एव नरः सुखी च भवितुं (iv) ----------।

मञ्जूषा

सक्षमः, शक्नोति, क्रोधस्य, मृत्योः

अथवा

'कपीनां मेदसा दोषो वह्निदाहसमुद्भवः ।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥

अन्वयः - हे राजन् ! यथा प्रातः काले (i) -------- उदिते सति (ii) ------------ नाशं गच्छति तथैव (iii) --------- मेदसा अग्नेः दाहेन उत्पन्नः (iv) --------- दोषः नाशं प्राप्नोति ।

मञ्जूषा

अश्वानाम्, तमः, सूर्यः, वानराणाम्

प्रश्न 17. रेखाङ्ङ्कितपदेषु प्रसङ्गानुसारम् उचितम् अर्थचयनं कुरुत- (4×1=4)

(1) पर्जन्यः द्वादश समाः तद् राष्ट्र नाभिवर्षति ।

(क) इन्द्रः (ख) शक्रः (ग) मेघः

(2) ध्यायतः विषयान् <u>पुंसः</u> सङ्गः तेषु उपजायते ।

(क) श्रीकृष्णस्य (ख) विषयस्य (ग) पुरुषस्य

(घ) यः क्रोधस्य वेगं

(3) कलहान्तानि <u>हर्याणि</u> कुवाक्यान्तं च सौहृदम् ।

(क) राजभवनानि (ख) राष्ट्राणि (ग) विवादानि

(4) काकस्य <u>गात्रं</u> यदि काञ्चनस्य ।

(क) मुखम् (ख) अधरम् (ग) शरीरम्

प्रश्न 18. मञ्जूषायाः सहायतया पाठाधारित कवापूर्ति कुरुत- (8×½=4)

एकस्मिन् समये (i) ------- शिवीनां राजा अभवत् । दानधर्मादि कारणेन सः (ii) ---------- पिता इव आसीत्। तेन निर्धनानां सहायतार्थं (iii) -------- समन्ततः धन धान्यमृद्धाः (iv) --------- निर्मिताः। तत्र याचकाः आगत्य अन्नम्, पानम्, धनम्, रजतम्, सुवर्णं च यथेच्छं (v) ---------- अनयन्। तस्य दानशीलतायाः (vi) ----------- देवराजः इन्द्रः एकदा तस्य समीपम् आगम्य तम् (vii) ----------- अयाचत् । ततः नृपः तस्मै स्व वे नेत्रे एव (viii) --------------। तस्य दानम् अकरोत्। पश्चात् एकदा राजा पश्चात् इन्द्रः प्रशंसाम् विहरति स्म। तदा तत्र आगम्य शक्रः तस्मै द्वे नेत्रे एव अयच्छत् ।

मञ्जूषा

नगरस्य, दानशालाः, बोधिसत्त्वः, सामग्रीः, नेत्रम्, अयच्छत्, प्रजायाः, परीक्षार्थम्, ।

======================== सफलतायै शुभाशयाः ===================